International Journal of Sanskrit Research 2023; 9(1): 207-209

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(1): 207-209
© 2023 IJSR
www.anantaajournal.com
Received: 10-12-2022
Accepted: 11-01-2023

**प्रसेनजित् मालो**
शोधछात्र,संस्कृतविभागः तिलकामाझीं भागलपुर विश्वविद्यालय, भागलपुर, बिहार, भारत

**Corresponding Author:**
**प्रसेनजित् मालो**
शोधछात्र,संस्कृतविभागः तिलकामाझीं भागलपुर विश्वविद्यालय, भागलपुर, बिहार, भारत

# श्रीजीवन्यायतीर्थेन विरचितस्य चिपिटक–चर्वणम् प्रहसनस्य समीक्षात्मकमध्ययनम्

**प्रसेनजित् मालो**

**सारांश**
साहित्यं समाजस्य दर्पणमिति।सुप्राचीनकालादेव सामाजिकवृत्तानां शुभाशुभानां प्रतिफलनं साहित्येषु पौनःपुण्येन नयनयोः पान्थायते।आधुनिकसंस्कृतसाहित्येऽपि समकालिके समाजे घटमानानां नैकानां वृत्तानां प्रतिच्छविः दृग्गोचरीभवतीत्यत्र नास्ति काचित् संशीति।समाजे मूल्यवोधावक्षयस्य नग्नचित्रं वहुषु रूपकेषु चित्रितम्।अस्मिन् प्रहसनेऽपि तत्चित्रं प्रतिफलितम्।अत्रापि हास्यरसच्छलेन नाट्यकृत् समाजे दृढमूलां धनिदरिद्रयोर्विषमावस्थामुद्दिश्य प्रश्नायते।यथा समाजे अनेकप्रकाराः जनाः अवलोकिताः सन्ति तथा अत्रापि कृपणपाखण्डिनां असहायानां च चरित्रमपि प्रतिफलितम्।कालान्तरेण जनाः आधुनिकाः अभवन् परन्तु स्वार्थः लोभः च परिलक्षते।अस्मिन् प्रहसने तादृशस्य समाजस्य नग्नचित्रं यथायथवर्णना क्रियते।

**कूटशव्दाः** प्रहसनम्, चिपिटकचर्वणम्, नाटकम्, आधुनिक संस्कृत साहित्यम्, कृपणम्, पाखण्डी, भृत्याः, सामाजिकोऽवक्षयः, पुरुषतान्त्रिकसमाजः।

## प्रस्तावना

प्राचीनसंस्कृतसाहित्यमिव आधुनिकसंस्कृतसाहित्यमपि विशालमिति।रामायण–महाभारतादीन् महाकाव्यानवलम्व्य यद्यपि वहूनि नाटकानि संस्कृतसाहित्ये विरचितानि सन्ति तथापि ऊनविंशविंशशतकयोः नाट्यकाराः समसामयिकं सामाजिकमूल्यवोधविषयमवलम्व्य वहूनि नाटकानि विरचितवन्तः।तानि नाटकानि तु सामाजिकमानवानां जागरणं सचेतनतावृद्धिं च साधयन्ति।

भारतवर्षस्य भिन्न–भिन्नप्रदेशवत् पश्चिमवंगप्रदेशेऽपि आधुनिकसंस्कृतसाहित्यस्य वहूनि नाट्यकाराः विद्यन्ते।प्रदेशेस्यास्य बहुषु आधुनिकनाट्यकारेषु संस्कृतभाषायाः एकनिष्ठसेवको भारतीयसंस्कृतिमनस्को नैयायिकपंचाननतर्करत्नस्य सुतः श्रीजीवन्यायतीर्थ(भट्टाचार्यः) अन्यतमः। 1892खिष्टीयाव्दे एषः नाट्यकारवरः पश्चिमवंगप्रदेशस्य नैहाटि इत्यस्य स्हानस्य भाटपाडायामजायत। शतायुजीविनः श्रीजीवमहाभागा वहूनि श्रव्यकाव्यं दृश्यकाव्यं च विरचितवान्।तस्य दीर्घसारस्वतजीवने तेन वहूनि संस्कृत नाटकानि, प्रकरणानि, गीतिकाव्यानि, भानाः, व्यायोगाः,प्रहसनानि,स्तोत्रानि च लिखितानि।तस्य रचनायां समकालिकघटना चित्रिता,प्रतिविम्विता प्रकाशिता च भवति।तेषु एकं विशिष्टं प्रहसनमस्ति चिपिटकचर्वनमिति।'चिपिटकचर्वनम्'इत्येकं नितान्तमनवद्यं सहृदयहृदयावर्जकं प्रहसनम्।अत्र कपालिनाम्नः कस्यचित् धनिनः धनलोभिनः कृपनस्य श्रेष्ठिपुरुषस्य कथा कविना श्रीजीवन्यायतीर्थमहाभागैः अतिनिपुणतया सन्निवेशिता।धनलोभी अतिकृपणः कपाली नाम अस्य प्रहसनस्य नायकः।प्रकृते प्रहसने चपलस्य कृपणस्य कपालिनः उपहासास्पदं चरित्रं सुललितया गीर्वाणवाण्या चित्रितं वर्त्तते।

एकदा कपालिनः पितृ–पितामहक्रमात् प्राप्तं छतच्छिद्रं छत्रं पादुकायुगलं च गृहस्य भृत्यजनैः पथि निक्षिप्तम्।कश्चन कुक्कुरश्च तत् पादुकां नीत्वा धावितः।कपाली अपि सारमेयमुखात् पादुकामाच्छेत्तुं तमनुधावति।स्वस्वभावेन कुक्कुरेण कपाली दष्टः।स्रवद्रुधिरः कपाली विफलकामः गृहं प्रत्यागतः।स्त्री रंगिनी वैद्यमाह्वयति।परन्तु वैद्यस्य दक्षिणां दातुं न स्वीकरोति कपाली।दक्षिणादानेच्छाहीनः कपाली कुक्कुरवत् शव्दं कृत्वा नखदन्तेन वैद्यमाक्रमितुम् अचेष्टत।विकारग्रस्तस्य रोगिनः अभिनयं नाटयति सः।वैद्यऽपि भीतो सन् पलायितः।ततश्च रंगिण्याहूतः कश्चन तान्त्रिकः छद्मवेशी।प्रतिवेशिभिः सह परामर्शं कृत्वा रंगिणी तान्त्रिकेण महापुरुषस्य अभिनयं कारयति।कृपणस्य कपालिनः सकाशात् कूटकौशलेन धनलाभ एवास्ति तस्या उद्देश्यम्।व्ययह्रासकर–विधानेन तान्त्रिकः कपालिनः विश्वासम् अर्जितवान्।दक्षिणा तु तस्य तान्त्रिकस्य हरीतकीफलमेकम्।समेषां गृहजनानां च कृते तेन मासत्रयं यावत् चिपिटकचर्वणव्रतानुष्ठानं स्हिरीकृतम्।तच्छ्रुत्वा कपाली तु भृशमानन्दितो यतोऽयं प्रस्तावः तस्य कृते नूनमेव व्ययह्रासकरः।ततःकपालिनं लोभं प्रदर्श्य तान्त्रिकः तमाह यत् स यदि दशतोलकं सुवर्णं दद्यात्

तदा पूजाघटमध्ये स्हापितं तत् सुवर्णं मासद्वयेन त्रिंशतोलकं भवेत्।केवलं घटस्य दासस्पर्शः परिहरणीयः।घटमध्ये सुवर्णं स्हापयन् वस्त्रेण च्छादयति मन्त्रं च पठति सः।परन्तु तान्त्रिकस्य पूर्वाभिसन्ध्यनुसारं दासस्पर्शात् सर्वं सुवर्णं द्रवीभूतम्।अन्तिमे तान्त्रिकस्य प्रतिवेशिजनानां च साहाय्येन रंगिणी कृपनस्य श्रेष्ठिनः कपालिनः दशतोलकं सुवर्णं प्राप्नोति।ततः भरतवाक्येन चिपिटकचर्वणमिति प्रहसनस्य समाप्तिः भवति।

'चिपिटकचर्वणम्'इति–पदस्य व्याकरणगतवैशिष्ट्यं ईदृशम्।चिपिटकचर्वणं चिपिटकचर्वनमिति षष्ठीतत्पुरुषसमासः।चिपिटको भक्ष्यद्रव्यविशेषः।'चिडेतिभाषे'ति शव्दकल्पद्रुमे व्याख्यातम्।चयतीति चिः।ततो वाहुलकात् पिटच्–प्रत्यये चिपिटः।चिपिटपदात् स्वार्थे कन्–प्रत्यये चिपिटकपदं साधु।अदनार्थकात् चर्व–धातोः भावे ल्युटि चर्वणमिति पदनिष्पत्तिः।दन्तैचूर्णनं रसास्वादव्यापारो व्यासार्थः।अतो 'चिडे'ति भक्ष्यद्रव्यविशेषस्य रसास्वादरूपोऽर्थः प्राप्यते।तदधिकृत्य प्रणीतं प्रहसनं 'चिपिटकचर्वणमि'ति फलितम्।

प्राचीनसंस्कृतनाटकानि तु भरतमुनेः नाट्यशास्त्रमवलम्ब्य विरचितानि आसन्।किन्तु आधुनिकसंस्कृतनाटकेषु तन्नियमस्य काचित् भिन्नता परिलक्ष्यते।चिपिटकचर्वणमित्यत्र संस्कृतालंकारशास्त्रस्य नियमान् प्रायेन सम्यक् रूपेण परिपाल्यते इति वक्तुं शक्यते।कविराजेन विश्वनाथाचार्येण दशविधरूपकेषु प्रहसनस्य लक्षणविषये उक्तम्–

भानवत् सन्धिसन्ध्यंगलास्यंगांकैर्विनिर्मितम्।
भवेत् प्रहसनं वृत्तं निन्द्यानां कविकल्पितम्।।
अत्र नारभटी,नापि विष्कम्भक–प्रवेशकौ।
अंगी हास्यरसस्तत्र वीथ्यंगानां स्हितिर्नवा।।[1]

यथा भाणाख्यरूपके सन्धीनां सन्ध्यंगानां लास्यांगानाम् अंकसंख्यायाः च व्यवस्था वर्तते तथा एव प्रहसने व्यवस्था विद्यते। किन्तु प्रहसने कविकल्पितानां निन्द्यानां चरितानां वृत्तम् आश्रित्य रूपकं प्रस्तूयते। प्रहसने आरभटीवृत्तिः न भवेत्,तथा विष्कम्भकप्रवेशकौ अपि न भवेताम्।किंच वीथ्यंगानि अत्र न भवेयुः,अवस्हानं न भवेत्। अत्र हास्य रसः एव अंगीरसः।

लक्षणमेतदनुसारतः चिपिटकचर्वणं नाम रूपकमिदं प्रहसनरूपेण परिगण्यते।त्रिविधेषु प्रहसनेषु प्रहसनम् इदं शुद्धम्।यतो अत्र पाखन्डी,विप्रः,चेटः,चेटी,विटः प्रमुखानि पात्राणि स्वीयैः ब्यवहारैः हास्यप्रयोजकवचोभिः वा हास्यं पुष्णीयुः।अस्मिन् रूपके तु तान्त्रिकस्य चरितं पाखन्डिनः चरितम्।यतो सः अत्र प्रवंचनम् एवं मुख्यतया करोति।कपाली कश्चन श्रेष्ठी।स द्विजः भवति।कपालिनः भृत्यः पंगुरामनामधेयः चेटः।कपालिनः भृत्या कुब्जा मन्थरा चेटी।एतेषां चेष्टितेन भाषादिभिः च हासः अत्र व्यज्यते।अतो इदं प्रहसनं शुद्धं प्रहसनम्।

चिपिटकचर्वणमिति प्रहसने कवेः श्रीजीवमहोदयस्य निपुणा कवित्वशक्तिः प्रकटिता।रूपकमिदं प्रहसनलक्षणत्वाद्–हास्यरसप्रधानमेव।अलंकारशास्त्रानुसारेणैव रूपकेऽस्मिन् नान्दी–प्रस्तावना–भरतवाक्यानि सन्निवेशितानि।भाषाव्यवहारेऽपि कवेर्निपुणता परिलक्ष्यते।एतेषु चरितेषु सूत्रधारस्य तान्त्रिकस्य कपालिनः वैदस्य रंगिण्याः च भाषा संस्कृतम् अस्ति।विदूषकस्य पंगुरामस्य मन्थरायाः च प्राकृती भाषा।हास्यरस–परिवेशने कविः सिद्धहस्तः।प्रहसनत्वात् हास्यरसः एवास्य अंगीरसः। कपाली नाम नायकः अत्र कार्पण्यातिशय्यात् हास्यरसं यथेष्टं जनयति।तस्य भृत्यः पंगुः पंगुरामः दासी च कुब्जी मन्थरा।तौ च तेषाम् अंगभंग्या वचनेन च हास्योद्रेकं घटयति।कपाली यदा स्वस्य जीर्णं पुरातनं छत्रं मार्गे। पतितं दृष्ट्वा अतीव क्रुद्धः भूत्वा गृहम् आगत्य उद्बन्धनाय रज्जुं याचते तदा रंगिणी रज्जुम् अग्रे स्थापयित्वा कथयति–

**रंगिणी–"भो वृद्धिवृहस्पते! (रज्जुं पुरतःप्रक्षिप्य)गृह्यतामियं रज्जुः।एकस्य च्छिन्नच्छत्रस्य कृते मरणं वरयसे चेत्,सुखं निःशंकं निरातंकं म्रियस्व[2]।"**

रज्जुं दृष्ट्वा पुनः कुपितः हताशः च कपाली भार्यां तर्जयति।तस्य मरणेन रंगिणी विधवा स्यात् इति च स्मारयति।तदा रंगिणी कथयति–

**रंगिणी–जानामि विधवा स्यामिति।सधवापि किमधुना स्वर्गे वसामि,विधवा भूत्वा किं वा पातालं यास्यामि? तथापि जानामि–पत्युराज्ञा न लङ्गनीयेति।मां याचसेरज्जुं,गुरुजनाज्ञालङ्घनपातकपरिहाराय रज्जुं ते पुरतो रक्षामि[3]।**

एतद् श्रुत्वा इतोऽपि कुपितः कपाली किं वक्तव्यम् इति ज्ञातुम् अशक्नुवन् व्यङ्गेन कथयति यत् रङ्गिण्याः धर्मज्ञानं प्रखरम् अस्ति।तदा रङ्गिणी स्वस्याः धर्मज्ञानस्य प्रकटनाय व्यञ्जनाय कथयति–

नमोऽस्तु पतिदेवाय व्रह्मविष्णुस्वरूपिने।
चतुर्मुखोऽसि कलहे ताडने च चतुर्भुजः[4]।।

अत्र रङ्गिणी व्यङ्गेन हास्यरसेन च पतिं निन्दति।तस्मात् प्रहसनमिदं रसपरिवेशनेन,भाषाप्रयोगेन,चरित्रचित्रणेन च परिपुष्टिं लभते।

कपालिनः जीर्णं पुरातनं छत्रं मन्थरा मार्गे अक्षिपत्।तेन कुपितः कपाली मन्थराम् उद्दिश्य कथयति यत् छत्रम् आतपात् वर्षणात् च जनान् त्रायते।यत् छत्रं शरणागतेभ्यः आनन्दं प्रयच्छति तदेव छत्रं मन्थरा कथं मार्गे अक्षिपत्।यथा कश्चन क्रूरः निर्दयः जनः एकं लघुं वृक्षं कर्तयित्वा तं मार्गे निक्षिपति तथा एव मन्थरा छत्रम् अनाथं मत्वा यत् मार्गे न्यक्षिपत् तत् अतीव जघन्यं कार्यं अस्ति–

आतपवर्षात्राणां हर्षाय यच्छरणमापन्नानाम्।
कर्त्तितवालद्रुमवत् पथि तत् पातितमहो स्पर्द्धा[5]।।

अनेन कपालिनः चरित्रे कृपणेन सह मोहः अपि स्पष्टरूपेण परिलक्ष्यते।

कपाली कृपनः चेदपि पुरातनं वस्तूनि भविष्याय संग्रहीतुं प्रयत्नः तस्य वक्तव्येन परिदृश्यते।स कथयति यत् इदं छत्रं तस्य पितामहेन तस्य पित्रा च उपयुक्तं,सम्प्रति तस्य सेवायां निमग्नम् इदं छत्रं तस्य पुत्रं पौत्रं च सेविष्यते–

मम पुत्रपौत्रसुखभोग्यं छत्रमिदं निक्षिपसि निर्दयम्?[6]

कपालिनः कृपणता नाट्यकृता प्रहसनस्य प्रतिच्छत्रं निरूपिता।यदा शुनकदंशनेन तस्य पादात् रुधिरं स्रवति स्म तदा वैद्यस्य दर्शनीं कः दास्यति इति विचारयन् वैद्यस्य आगमनं निराकर्तुं प्रवृत्तः।नूतनस्य कटस्य आस्तरणेन कटः जीर्यति इति चिन्ता स्वशरीरात् वहवः रक्तस्य अपेक्षया तस्य कृते समधिकपीडाकरी आसीत्।

भारतीये तथा वङ्गीये समाजे मूल्यवोधावक्षयस्य नग्नचित्रं प्रायः सर्वेष्वेव रूपकेषु श्रीजीवन्यायतीर्थेन चित्रितम्।समाजे वहवः एव जनाः स्वार्थसिद्धौ सदा लिप्ताः।धनार्जनमोहाविष्टास्ते न्यायान्यायभेदं विस्मृतिं गताः,प्रेमस्नेहादिगुणवर्जिताः केवलं स्वार्थचिन्तामग्नाः सञ्जाताः।केचिद् च अतीव कृपणाः न केवल स्व–परिवार–सुख–विमुखाः अपि तु स्व–सुख–विमुखाश्च वर्तन्ते।चिपिटकचर्वणं श्रीजीवस्य तादृशस्य सामाजिकस्य कस्यचिच्चरित्रचित्रणं यो हि धनलोभी तथा च कृपणः।नाम तस्य कपाली यः अस्य प्रहसनस्य नायकः।कार्पण्यस्य पराकाष्ठा स तत् सीमामपि तदातिक्रामति यदा शुना दष्टोऽपि प्राणेभ्योऽप्यधिकप्रियस्य शतच्छिद्रस्य छत्रस्य भग्नताहेतोः पादुकाद्वयस्य च परिभ्रष्टताहेतोः विषण्णः किल सः।रसिकप्रवराः आस्वादयन्तु श्रीजीवप्रयुक्तं शृङ्गारवर्जितं निर्मलं रसं–कपाली।हा कष्टम्।कुक्कुरेण दष्टोऽस्मि।छत्रेण प्रहरतो मे छत्रमपि भग्नम्।पादुकामपि भक्ष्यमाणां

वलादाच्छिन्दन् सारमेयेनाक्रान्त–पलायमानः पदे पदे दष्टोऽस्मि।न मे दंशने व्यथा,तच्छत्रं भग्नं पादुकाद्वयं गतमित्यवसीदामि।
आवहोः कालादेव समाजे निष्पेषिताः खलु नार्यः।भूरिशस्तत्सम्वन्ध्युदाहरणं यथा वैदिकसाहित्येऽवाप्यते,तथैव साम्प्रतिकाः कवयोऽपि स्वकीयकाव्येषु तद्विषयमुपजीव्य लिखन्ति,प्रतिवादं कुर्वन्ति,समाजस्य नग्नं चित्रञ्च चित्रयन्ति।पुरुषशासिते समाजे स्त्रीणां निम्नस्थानम् अद्यापि वर्तते।पुंमनःसु नारीणां स्थानं गृहे अथवा पाकशालायामेवेति।ततो वहिर्गमनं नाम तासां चरित्रेषु दोषाविष्करणं कालिमालेपनञ्च।अत्रापि प्रकृत–प्रहसनेऽपि तदेव स्फुटम्।यत्र खलु पुरुषस्य गृहावस्थितिर्नाम गृहे चौरप्रवेशः,रन्धनागारप्रयाणं च पुरुषासम्माननेपेतम्।गृहे पाचनकर्मणि नारीणामेव नियुक्तिः सर्वदा भवेदिति समाजस्यालिखितो नियमः।
तथाहि प्रस्तुते प्रहसने सूत्रधारविदूषकयोः कथोपकथनावसरे पुरुषतांत्रिकसमाजस्य छाया तु स्पष्टा–

सूत्रधार।भो वयस्य! व्यापृतस्त्वं कस्मिन् कर्मणि?
(नेपथ्ये)विदूषक।अज्ज क्खु कोआगरपव्वदिवसी।कुडुम्विनी मं ण परिच्चिअदि।
(अद्य खलु कोजागरपर्वदिवसः, कुटुम्विनी मां न परित्यजति)।
सूत्रधार।किं वन्धने रन्धने वा रक्षितोऽसि?
((प्रविश्य) विदूषक।मारिसं पुरिससिंधं चोरं विअ आदु पाचअं विअका संजमिदुं पारेदि? एसोम्हि आअदो।
(मादृशं पुरुषसिंह चौरमिवाथवा पाचकमिव का संयन्तुं पारयति? एषोऽस्म्यागतः)[8]।

समाजे भृत्याः प्रभूनां प्रहारयोग्याः अपि आसन् इति कपालिना पङ्गुराम–प्रहाराय तत्पश्चाद्धावने प्रतीयते।भन्डतान्त्रिक–चरित्र–चित्रणेन तत्कालीने समाजे भन्डगुरु–साधकानाञ्च प्रभावः प्रतीयते।
विपरीतं चित्रमपि चिपिटकचर्वणे दृश्यते।समाजे सज्जनाः अपि सन्ति।प्रतिवेशिभिः कपालिनः भार्यायाः साहाय्येन एवं प्रतीयते।
एवं प्रकारेण श्रीजीवमहोदयेन चिपिटकचर्वणमिति प्रहसने तत्कालीन–समाजचित्रं हास्यरसात्मकतया निपुणहस्तेन चित्रितम्।नाट्यकारेण रूपकस्यान्ते भरतवाक्येन लक्ष्मी–सरस्वत्योः विरोधावसानप्रार्थना वर्णयित्वा वैरं विस्मृत्य परस्परसौहार्दता काङ्खिता।अतोऽस्माभिः समाजस्य अस्याः वैषम्यास्थितेः परिवर्तनसाधनं कृत्वा सुन्दरसमाजस्य निर्माणं करणीयमिति।

**सन्दर्भग्रन्हसूची**

1. चक्रवर्ती.ड.कमलकृष्ण, संस्कृत मञ्जरी,वाणीप्रकाशन।प्रकाशन–2019।
2. दास.ड.राकेश;दिन्डा जयदेव,साम्मानिक संस्कृत वर्त्तिका,वि.एन्. पाव्लिकेशन्।प्रकाशन–2019।
3. चट्टोपाध्याय.ऋता;सेन सौमजित्,श्रीजीवन्यायतीर्थ ओ ‘चिपिटक–चर्वणम्’, संस्कृत वुक डिपो।प्रकाशन–2018।
4. चट्टोपाध्याय.ऋता, आधुनिक संस्कृत साहित्य 1910–2010छोटोगल्प ओ नाटक, कोलकाता, प्रगेसिभ पावलिशार्स–2012।
5. मुखोपाध्याय.ड.विमलाकान्त,साहित्यदर्पणम्(सम्पूर्णः), संस्कृत पुस्तक भान्डार। प्रकाशन–2013।
6. सिंह.ड. सत्यव्रत(सम्पा),2013,साहित्यदर्पणम्(सम्पूर्णः)विश्वनाथाचार्यः,चौखाम्वा विद्याभवन,वाराणसी।
7. उपाध्याय. रामजी, आधुनिक संस्कृत–नाटक, संस्कृत–परिषद्,सागर–विश्वविद्यालय,सागर।
8. वन्द्योपाध्याय. उदयचन्द्र(सम्पा),साहित्यदर्पणम्(विश्वनाथ–प्रणीत),षष्ठपरिच्छेदः–2015।